# S S LC Public Examination March 2015

Model Question Paper – First Language Samskritam -16S (P/F)

दशमकक्ष्या – प्रथमभाषा – संस्कृतम् । मार्गदर्शिनी प्रश्नपत्रिका । ( 16 S ) बाह्याभ्यर्थिनां कृते ।

(ಹತ್ತನೆ ತರಗತಿ ಮಾದರಿ ಪ್ರಶ್ನಪತ್ರಿಕೆ. ಸಂಸ್ಕೃತಪ್ರಥಮ ಭಾಷೆ. (ಹೊಸಪಠ್ಯಕ್ಕೆ ಸಂಬಂಧಿಸಿದಂತೆ– ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿಗಳಿಗಾಗಿ ) ಪಿ/ಎಫ್

- **एकवाक्येन उत्तरं लिखत ।** **16x1=16**

१. अञ्जना कीदृशं सुतं प्रासूत ?

२. केषां विभूतयः परोपकाराय भवन्ति ?

३. उप्तं बीजं केन विना निष्फलं भवति ?

४. इदं सर्वं केन वास्यम् ?

५. चन्नम्मायाः पतिः कः ?

६. रमारमणं कः अभिदुद्राव ?

७. करणस्य सारथिः कः ?

८. कापालिकः कथम् अ्सीत् ?

९. शैलशृङ्गवासिनी का ?

१०. नाट्यस्य गरिमाणं कः अवर्णयत् ?

११.आकाशकायेषु आकर्षणीयः शक्तिस्वरूपः कः ?

१२. दधीचिमहर्षेः आश्रमः कुत्र अ्सीत् ?

१३. लोके किं सदा शाम्यतु ?

१४. कीदृशम् औषधं दुर्लभम् ?

१५. भिषजः रोगनिदानं कथं जानन्ति ?

१६. संस्कृतसाहित्यक्षेत्रे ज्ञानपीठप्रशस्तिपुरस्कृतः कः ?

- **चतुर्थं पदं लिखत ।** **4x1 =04**

१७. विनापुष्पं फलन्ति – वनस्पतयः :: सह पुष्पैः फलन्ति ____ ।

१८. लीलावती – भास्कराचार्यः :: रसरत्नाकरः _______ ।

१९. रष्यादेशः – अणुविकिरणः :: आर्टिक् प्रदेशः ______ ।

२०. कुर्यादाहारं – प्राणसन्धारणार्थम् :: प्राणाः सन्धार्याः ______ ।

- **लघूत्तराणि लिखत ।** **5x2= 10**

२१. मानवः कथं निर्वेदम् आप्नोति ? ततः सः किं कुरुते ?

२२. नरस्य वृत्तं के जानन्ति ?

२३. बुद्धिसागरः मुञ्जं किं प्राह ?

२४. तैत्तिरीये सूर्यस्यविषये किं लिखितमस्ति ?

२५. अशरीरवाणी का ?

- **श्लोकयोः तात्पर्यं संस्कृतभाषया आङ्ग्लभाषया कर्णाटकभाषया वा लिखत ।** **2x2 = 04**

२६. यत्र कुत्र वा वयं समग्रभारते स्थिताः
भाषयापि धर्मतश्च भिन्नमार्गमार्गमाश्रिताः ।
आदितश्च मध्यतस्तथान्ततश्चभारता
भारतीयभावनेति वृद्धिमेतु भारते ॥

२७. धीरोद्धतो धीरललितः धीरोदात्तस्तथैव च ।
धीरप्रशान्तश्चैवेति नायकाः नाटकाश्रयाः ॥

- **कव्योः देश–काल–कृतीनां विषये लिखत ।** **2x3 = 06**

२८. वाल्मीकिः

२९. नीलकण्ठदीक्षितः

- **यथानिर्देशं लिखत ।** **4x3=12**

३०. सः महर्षिः धर्मात्मा उदारश्च ।
कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

३१. किन्तु भवन्तं परिश्रान्तं पश्यामि ।
कः पाठः ? का अवदत् ? परिश्रान्तः कः ?

३२. मया भोजो रक्षितः ।
कः वदति ? कं वदति ? कुत्रगत्य वदति ?

३३. रसे गन्धे न रज्यते ।
कः पाठः ? कः अवदत् ? कः न रज्यते ?

- **दशभिः वाक्यैः उत्तरं संस्कृतभाषया कर्णाटकभाषया आङ्ग्लभाषया वा लिखत ।** **4x3=12**

३४. डा ॥ सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

३५. धर्मराजस्य उपदेशं विवृणुत ।

३६. हनूमतः जननं बाल्यवृत्तान्तञ्च पद्यानुगुणं लिखत ।

- **पद्यद्वयं पूरयत ।** 4x2=08

३७. मनीषिणः सन्ति ____________________ दुर्लभम् ॥

३८. पिबन्ति नद्यः ______________________ विभूतयः ॥

३९. **अधो लिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितप्रश्नानामुत्तरं लिखत ।** 1x4=04

चाणक्यः चन्द्रगुप्तमौर्यस्य मन्त्री अ्सीत् । सः एकस्मिन् उब्जे वसति स्म । राजा दरिद्रेभ्यः दातुं कम्बलानि दत्तवानासीत् । चोराः केचन कम्बलानि अपहर्तुम् उटजमागताः । शीतकालेऽपि चाणक्यः कम्बलं विनैव भूमौ सुप्तः आसीत् । चकिताः चोराः तम् अपृच्छन् - 'अत्यन्तं शैत्यमस्ति , अत्रैव कम्बलानि सन्ति । तथापि त्वं किमर्थं कम्बलं विना शयनं करोषि ?' इत । तदा चाणक्यः – 'दरिद्रेभ्यः दातुं राजा दत्तवान् , एतानि मम कृते न ' इत्यवदत् । तदा अन्येषां द्रव्यस्य उपयोगः अधर्मः इति चिन्तयन्तः चोरा अपि सज्जना अभवन् ।

१. चाणक्यः कस्य मन्त्री आसीत् ?
२. अधर्मः कः इति चोराणाम् आशयः ?
३. राजा किमर्थं कम्बलानि दत्तवान् ?
४. चोराः कुतः उटजमागताः ?

**भागः B**

**( व्याकरण विभागः )**

- **समुचितमुत्तरं चित्वा क्रमाक्षरेण सह निर्दिष्टस्थाने लिखत ।** **15x1= 15**

४०. सुतः – अस्य अन्यलिङ्गपदम् इदं भवति ।

अ) सुता आ) सूतः इ) सुती ई) सूता

४१. पुत्रोऽहम् – अस्य सन्धिविभागः एवं भवति ।

अ) पुत्रो + हम् आ) पुत्रो + अहम् इ) पुत्रो +ऽहम् ई) पुत्र + उहम्

४२. फालचन्द्रः – अत्र एषः समासः वर्तते ।

अ) तत्पुरुषः आ) द्वन्द्वः इ) बहुव्रीहिः ई) अव्ययीभावः

४३. ययौ – अत्र एषः लकारः वर्तते ।

अ) लङ् आ) लिङ् इ) लुङ् ई) लिट्

४४. अनामयः – अस्य विरुद्धार्थकं पदम् इदं भवति ।

अ) नामयः आ) नानामयः इ) आमयः ई) महामयः

४५. अत्र समूहेतरपदम् इदं भवति ।

अ) ररक्ष आ) आविश इ) व्यादिष्टः ई) प्राह

४६. विपिनम् – अस्य समानार्थकपदम् एतदस्ति ।

अ) अरण्यम् आ) आननम् इ) भुवनम् ई) मलिनम्

४७. एषु शुद्धं वाक्यम् इल्मस्ति ।

अ) बालेन पाठः पठनीयः आ) बालः पाठं पठनीयः ।
इ) बालः पाठः पठनीयः । ई) बालात् पाठः पठनीयः ।

४८. प्रतिवर्षम् – अस्य विग्रहवाक्यम् एवं भवति ।

अ) प्रति वर्षम् आ) वर्षं वर्षं प्रति इ) प्रति प्रति वर्षम् ई) प्रत्येकं वर्षम्

४९. वारणः इति पदस्य समानार्थकं पदमस्ति एतत् ।

अ) हालाहलः आ) लक्ष्मीरमणः इ) गजः ई) वरुणः

५०. बभूवुः अस्य वचनम् एतत् अस्ति ।

अ) एकवचनम् आ) द्विवचनम् इ) बहुवचनम् ई) सुवचनम्

५१. भूमिः इति पदस्य लिङ्गम् एतद्भवति ।

अ) पुल्लिङ्गम् आ) स्त्रीलिङ्गम् इ) नपुंसकल्ङ्गम् ई) त्रिलिङ्गम्

५२. वृद्धिः अस्य विरुद्धार्थकं पदमेतत् भवति ।

अ) बुद्धिः आ) सिद्धिः इ) क्षयः ई) पयः

५३. अत्र समूहेतरपदम् इदं भवति ।

अ) भास्करः आ) अर्कः इ) रविः ई) राहुः

५४. वयम् - अत्र एषाविभक्तिरस्ति ।

अ) प्रथमा आ) तृतीया इ) पञ्चमी ई) सप्तमी

**५५. प्रयोगपरिवर्तनं कुरुत ।** 02

अ) अहं जलं पिबामि । आ) पित्रा कार्यालयः गम्यते ।

**५६. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।** 02

अ) मम देहरक्षा अङ्गैः सह जनितम् । आ) भाग्यानि काले फलन्ति ।

**५७. वाक्ये विद्यमानं कृदन्तपदं चित्वा लिखत ।** 02

अ) पठन् बालकः किमपि न गणयति । आ) सेवकः ग्रामं गतवान् ।

**५८. वाक्यदोषं परिहरत ।** 02

अ० नगरस्य बहिः उद्यानम् अस्ति । आ) वीरस्य युद्धं रोचते ।

**५९. सन्धिं विभज्य नाम लिखत ।** 02

अ) एतदुपरि आ) धेनुर्धावति

**६०. लकार–पुरुष–वचनानि लिखत ।** 02

अ) बभासे आ) जानाति

**६१. वाक्ये विद्यमानम् अलङ्कारं विवृणुत ।** 1x3=03

माघे मेघे गतं वयः ।

६२. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** 1x3=03

नादन्ति सस्यं खलु वारिवाहाः ।

## भागः C

### ( रचना विभागः )

- **संस्कृतभाषया अनुवादं कुरुत ।** 1x3=03

६३. ವಿದ್ಯಾರ್ಥಿ ಜೀವನವು ಅಮೂಲ್ಯವಾದುದಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಯು ಸದಾ ಉತ್ಸಾಹದಿಂದ ಇರಬೇಕು. ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸಬೇಕು.

- **कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** 1x3=03

६४. दीपः वर्तिद्वारा तैलं गृह्णाति ज्वलति च । यदा तैलं शुष्यति तदा ज्वाला नश्यति । तैलदीपाःवायुना शाम्यन्ति विद्युद्दीपाः न शाम्यन्ति । नगरेषु विद्युद्दीपाः प्रकाशन्ते ।

६५. गौतमः / गौतमी इति मत्वा प्रवासार्थं धनं प्रेषयितुं पितरम् / मातरं प्रति **पत्रं लिखत ।**
1x5=05

**अथवा**

दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्ययं प्रति **पत्रं लिखत ।**

- **प्रबन्धं लिखत ।** 1x5=05

६६. परिसरः अथवा समाचारपत्रम्

***